# कक्षा – द्वादशी
## संस्कृतम् (ऐच्छिकम्, कोड सं.-022)
## आदर्शप्रश्नपत्रम् – 2022-23

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

| | |
|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः (ख) रचनात्मक–कार्यम् | - 10 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त–व्याकरणम् | - 15 अङ्काः |
| खण्डः (घ) (i) पठित-अवबोधनम् | - 25 अङ्काः |
| (ii) संस्कृतसाहित्येतिहासपरिचयः | - 10 अङ्काः |
| खण्डः (ङ) छन्दोऽलंकारपरिचयः | - 10 अङ्काः |

**निर्देशाः –**

(i) अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **खण्डः - 'क'**<br>**अपठित-अवबोधनम्      10 अङ्काः** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –**<br>कस्मिंश्चित् अधिष्ठाने चत्वारो जनाः परस्परं मित्रत्वम् आपन्नाः वसन्ति स्म। बालभावे तेषां मतिः अजायत-'भोः! देशान्तरं गत्वा विद्यायाः उपार्जनं करणीयम्' इति। अथ अन्यस्मिन् दिवसे तानि चत्वारि मित्राणि परस्परं निश्चयं कृत्वा विद्योपार्जनाय कान्यकुब्जम् (कन्नौजम्) अगच्छन् तत्र च विद्यामठं प्राप्य विद्याध्ययनम् अकुर्वन्। एवं द्वादशवर्षाणि यावदेकचित्ततया पठित्वा विद्याकुशलाः ते सर्वे सञ्जाताः। ततः तैः चतुर्भिः मिलित्वा निश्चितम् यत् 'वयं सर्वविद्यापारङ्गताः तदुपाध्यायाद् अनुमतिं लब्ध्वा स्वदेशं गच्छामः'। गुर्वादेशं प्राप्य सर्वे स्वदेशं प्रति गताः यद्यपि विद्यापारङ्गतास्ते तथापि लोकव्यवहाराणां ज्ञानाभावात् सर्वत्र हास्यमुपगताः। अतः जीवने व्यवहारज्ञानं नूनम् आवश्यकमिति, व्यवहारज्ञानं विना केवलं शास्त्रज्ञानं सर्वदा हास्यकारणमेव भवति।<br>कथ्यते अपि – **अपि शास्त्रेषु कुशलाः लोकाचारविवर्जिताः।**<br>**सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः॥** | 10 |
| | **(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) सर्वविद्यापारङ्गताः जनाः कुत्र गन्तुम् इच्छन्ति?<br>(ख) जीवने कीदृशं ज्ञानम् आवश्यकं भवति?<br>(ग) चत्वारि मित्राणि विद्योपार्जनाय कुत्र अगच्छन्? | 1x2=2 |
| | **(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(क) चत्वारो जनाः किमर्थं देशान्तरं गन्तुम् इच्छन्ति स्म?<br>(ख) जनाः कान्यकुब्जे कति वर्षाणि यावत् अधीतवन्तः?<br>(ग) कीदृशाः जनाः हास्यतां यान्ति? | 2x2=4 |
| | **(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-** | 1 |
| | **(ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्)**<br>(क) 'सर्वे ते हास्यतां यान्ति' अत्र 'ते' इति कर्तृपदस्य क्रियापदं किम्?<br>(i) सर्वे (ii) यान्ति<br>(iii) हास्यताम् (iv) यथा<br>(ख) 'यद्यपि विद्यापारङ्गतास्ते' अत्र 'निपुणाः' इति पदस्य पर्यायपदं किम्?<br>(i) ते (ii) विद्या<br>(iii) पारङ्गताः (iv) यद्यपि | 1x3=3 |

| | | |
|---|---|---|
| | (ग) 'शास्त्रज्ञानं हास्यकारणमेव भवति' अत्र किं विशेष्यपदम्?<br>(i) शास्त्रज्ञानम् (ii) हास्यकारणम्<br>(iii) एव (iv) भवति<br>(घ) 'वयं सर्वविद्यापारङ्गताः स्वदेशं गच्छामः' अत्र 'वयम्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?<br>(i) कुशलेभ्यः (ii) तेभ्यः<br>(iii) स्वदेशाय (iv) चतुर्मित्रेभ्यः | |
| | | |
| | **खण्डः - 'ख'**<br>**रचनात्मक–कार्यम् 10 अङ्काः** | |
| 2. | **भवान् भवती वा गङ्गटोकनगरे वसति। सिक्किम–प्रदेशस्य प्राकृतिकसौन्दर्यं सम्पदां च वर्णयन् / वर्णयन्ती दिल्लीवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत।**<br>**मञ्जूषा-**<br>नमो नमः, भारतस्य, पूर्वभागे, प्राकृतिकसौन्दर्यम्, हरीतिमा, पर्यटनस्थलम्, प्रसिद्धम्, वनसम्पदा, पर्यटकानाम् आकर्षणकेन्द्रम्, कञ्चनजङ्गाशिखरम्, सपरिवारम, आगच्छतु, मिलित्वा, भ्रमिष्यामः, प्रणामान्, निवेदयतु<br>**अथवा**<br>**स्वविद्यालयस्य प्रधानाचार्यं प्रति पत्रं लिखित्वा निवेदयतु यत् पुस्तकालये संस्कृतच्छात्रेभ्यः अतिरिक्तपठनाय संस्कृतबालसाहित्यस्य लघुकथापुस्तकानां च व्यवस्थां कारयतु।**<br>**मञ्जूषा-**<br>सेवायाम्, श्रीमन्तः प्रधानाचार्याः, पुस्तकालये, संस्कृतपुस्तकानाम्, व्यवस्थायै, अतिरिक्तपठनाय, रुचिवर्धनम्, पठनकौशलविकासाय, आवश्यकम्, छात्राणाम्, न सन्ति, संस्कृतपठनाय, प्रेरिताः, उपकारः, भवताम्, आज्ञाकारिणः, भविष्यति, धन्यवादाः, सविनयम्, निवेदनम्। | 1×5=5 |
| | | |
| 3. | **प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –**<br>**विषयः – विद्याविहीनः पशुः।**<br>विद्यायाः महत्त्वम्<br>मानवस्य समग्रः विकासः भवति | 5 |

| | | |
|---|---|---|
| | उदाहरणमाध्यमेन विद्यायाः महत्त्वप्रतिपादनम्<br>विद्यायाः लाभाः उपसंहारश्च<br>**अथवा**<br>हिन्दीभाषया आङ्ग्लभाषया वा लिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत।<br>1. हिलते हुए वृक्षों से पत्ते गिर रहे थे।<br>The leaves were falling from the shaking trees.<br>2. संस्कृतभाषा सभी भषाओं की जननी है।<br>Sanskrit language is the mother of all languages.<br>3. रामायण और महाभारत भारतीय साहित्य के मूलस्रोत हैं।<br>Ramayana and Mhabharata are the original sources of Indian literature.<br>4. भारत की पुण्यभूमि पर ही वेदों का आविर्भाव हुआ था।<br>The vedas were boarn on the holy land of India.<br>5. हमें नदियों की रक्षा करनी चाहिए।<br>We should protect the rivers.<br>6. तुम सब विद्यालय कब जाओगे?<br>When will you all go to school?<br>7. सब लोग सुखी और नीरोग हों।<br>May everyone be happy and healthy. | |
| | | |
| | **खण्डः - 'ग'**<br>**अनुप्रयुक्त–व्याकरणम्        15 अङ्काः** | |
| | | |
| 4. | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) सूर्ये **तपत्यावरणाय** दृष्टेः कल्पेत लोकस्य कथं तमिस्रा।<br>(ख) एषः रोहितानां **मध्येचरः+भवतु**।<br>(ग) धनविषये **सञ्चयः** न कर्तव्यः।<br>(घ) सर्वं वृत्तान्तं तेषाम् **अग्रे+अकथयत्**। | 1×3=3 |

| | | |
|---|---|---|
| 5. | रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) धिक् चपल! किम् **उक्तवान्** असि?<br>(i) वच् +क्त (ii) वच् +शानच्<br>(iii) वच् +तव्यत् (iv) वच् +क्तवतु<br>(ख) स **मृत् + मयट्** वीतहिरण्मयत्वात्।<br>(i) मृण्मये (ii) मृत्मये<br>(iii) मृद्मये (iv) मृतमये<br>(ग) योगाङ्गानां विषये ज्ञातुं **महती** उत्कण्ठा अस्ति।<br>(i) महान् + ङीप् (ii) महत् + ङीप्<br>(iii) महत् + टाप् (iv) महत + ङीप्<br>(घ) लोष्ठैः **अभि + हन् + शतृ** उपनयतैनमश्वम्।<br>(i) अभिहन्तः (ii) अभिहतः<br>(iii) अभिघ्ननन्तः (iv) अभिघ्नन् | 1x3=3 |
| | | |
| 6. | मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) ............ कक्षा विशेषरूपेण सुसज्जिता अस्ति।<br>(ख) पुत्तलिकायाः वचनं श्रुत्वा राजा .......... आसीत्।<br>(ग) लब्धापि ......... दुःखेन परिपाल्यते।<br>(घ) पुत्र! ............ जीव।<br>**मञ्जूषा**<br>खलु, अद्य, चिरम्, तूष्णीम् | 1x3=3 |
| | | |
| 7. | कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)<br>(क) ............ परितः मेघमाला आसीत्। (पर्वतश्रेणी)<br>(ख) अलं ............., एकैकं कृत्वा बोधयामि। (चिन्ता)<br>(ग) समुद्रः ............. रत्नचतुष्टयं ददाति। (राजन्) | 1x3=3 |

| | | |
|---|---|---|
| | (घ) भयात् जनः .......... अनुगच्छति। (राजवचन) | |
| | | |
| 8. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) **<u>समाप्तविद्येन</u>** मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै।<br>(i) समाप्ता विद्या (ii) समाप्ता च विद्या च<br>(iii) समाप्ता विद्या येन, तेन (iv) समाप्तेन विद्येन<br>(ख) महिम्नामेतस्मिन् **<u>विनयशिशिरः</u>** मौग्ध्यमसृणः।<br>(i) विनयेन शिशिरः (ii) विनयस्य शिशिरः<br>(iii) विनये शिशिरः (iv) विनयः च शिशिरः<br>(ग) शुकनासः **<u>विस्तरेण सहितम्</u>** उवाच।<br>(i) सविस्तरः (ii) सविस्तरम्<br>(iii) सविस्तरेण (iv) विस्तारेण<br>(घ) पुनः अहं **<u>दीर्घः च असौ अवकाशः तम्</u>** स्वीकरिष्यामि।<br>(i) दीर्घावकाशौ (ii) दीर्घावकाशः<br>(iii) दीर्घअवकाशम् (iv) दीर्घावकाशम् | 1×3=3 |
| | | |
| | **खण्डः - (घ)**<br>**(i) पठितावबोधनम् 25 अङ्काः** | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>अस्मिन् समये एकः षोडशवर्षदेशीयो गौरो युवा हयेन पर्वतश्रेणीरुपर्युपरि गच्छति स्म। एष सुघटितदृढशरीरः श्याम–श्यामैर्गुच्छ–गुच्छैः कुञ्चित–कुञ्चितैः कच–कलापैः कमनीय–कपोलपालिः दूरागमनायासवशेन सूक्ष्म–मौक्तिक–पटलेनेव स्वेदबिन्दु–व्रजेन समाच्छादित––ललाट–कपोल–नासाग्रोत्तरोष्ठः प्रसन्नवदनाम्भोज–प्रदर्शित–दृढसिद्धान्त–महोत्साहः कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति।<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) सैनिकः किम् आदाय तोरणदुर्गं प्रयाति?<br>(ii) युवा हयेन कुत्र गच्छति स्म?<br>(iii) युवा कस्य विश्वासपात्रम् आसीत्? | 5<br><br>½×2=1 |

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् )<br>(i) सैनिकस्य ललाट–कपोलौ केन आच्छादितौ आस्ताम्?<br>(ii) गौरो युवा सैनिकः कति वर्षीयः आसीत्?<br>(iii) सैनिकस्य कपोलपाली कीदृशैः कचकलापैः कमनीये स्तः? | 1x2=2 |
| | (इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) 'गच्छति स्म' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?<br>(ii) 'षोडशवर्षदेशीयः' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?<br>(iii) 'अश्वेन' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत। | 1x2=2 |
| | | |
| 10. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -<br>**जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।**<br>**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च।।** | 5 |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कः अधिकप्रदाता आसीत्?<br>(ii) द्वौ अपि कीदृशौ अभवताम्?<br>(iii) कौत्सः कस्मादपि अधिकं धनम् अलभत? | ½x2=1 |
| | (आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )<br>(i) रघु–कौत्सौ कस्य अभिनन्दनीयौ अभवताम्?<br>(ii) नृपः कौत्साय कियद् धनम् अयच्छत्?<br>(iii) अर्थी कीदृशः आसीत्? | 1x2=2 |
| | (इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) 'द्वौ' इति कर्तृपदस्य क्रियापदं श्लोके किं प्रयुक्तम्?<br>(ii) 'नृपः' इति पदस्य विशेषणपदं श्लोके किं प्रयुक्तम्?<br>(iii) 'अयोध्यावासिनः' इति अर्थे श्लोके किं पदं प्रयुक्तम्? | 1x2=2 |
| | | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>**अरुन्धतीजनकौ** – महत्कौतुकं वत्सस्य।<br>**कौशल्या** – अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् | 5 |

| | | |
|---|---|---|
| | पलायमानं दीर्घायुषम्<br>**अरुन्धती** – अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)<br>**बटवः** – पश्यतु कुमारस्तावदाश्चर्यम्।<br>**लवः** – दृष्टमवगतं च। नूनमाश्मेधिकोऽयमश्वः।<br>**बटवः** – कथं ज्ञायते?<br>**लवः** – ननु मूर्खाः! पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकं शतसङ्ख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। यदि च विप्रत्ययस्तत्पृच्छत।<br>**बटवः** – भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति? | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | ½x2=1 |
| | (i) लवः कथं दूरम् अतिक्रान्तः अभवत्?<br>(ii) महत्कौतुकं कस्य अभवत्?<br>(iii) कः परिवृतः पर्यटति? | |
| | **(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (i) कौशल्या–अरुन्धती–जनकादयः कैः तोषिताः?<br>(ii) अश्वस्य रक्षितारः के आसन्?<br>(iii) कं पश्यन्ती कौशल्या वञ्चिता इव अभवत्? | |
| | **(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)** | 1x2=2 |
| | (i) ‘पर्यटति’ इति क्रियापदस्य कर्तृपदं नाट्यांशे किं प्रयुक्तम्?<br>(ii) ‘आश्वमेधिकोऽयमश्वः’ अत्र विशेषणपदं किं प्रयुक्तम्?<br>(iii) ‘विद्वांसः’ इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत। | |
| | | |
| 12. | **अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्)** | 1x4=4 |
| | (क) **जगत्सर्वम्** ईशावस्यम् अस्ति।<br>(ख) **विद्यया** अमृतम् अश्नुते।<br>(ग) **योगशिक्षा** अतीव उपयोगिनी अस्ति।<br>(घ) **सन्तोषात्** अनुत्तमः सुखलाभः भवति।<br>(ङ) **विद्याध्ययनेऽपि** योगस्य उपयोगः वर्तते। | |
| | | |

| | | |
|---|---|---|
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।<br>स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ | 3 |
| | | |
| 14. | अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।<br>ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।<br>भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥<br>अथवा<br>'दीनबन्धुः श्रीनायारः' इति पाठम् आधृत्य श्रीनायारमहोदयस्य चरित्रचित्रणं सङ्क्षेपेण संस्कृतभाषया लिखत। | 3 |
| | | |
| | **खण्डः - (घ)**<br>**(ii) संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः** | |
| | | |
| 15. | अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) रघुवंशस्य कस्मिन् सर्गे इन्दुमत्याः स्वयंवरस्य वर्णनम् अस्ति?<br>(i) द्वितीये सर्गे (ii) चतुर्थे सर्गे<br>(iii) षष्ठे सर्गे (iv) त्रयोदशे सर्गे<br>(ख) 'शिशुपालवधम्' इति महाकाव्यस्य रचयिता कः आसीत्?<br>(i) माघः (ii) श्रीहर्षः<br>(iii) भारविः (iv) कालिदासः<br>(ग) 'नवसाहसाङ्कचरितम्' इत्यस्मिन् महाकाव्ये कस्य राज्ञः वर्णनम् अस्ति?<br>(i) विक्रमादित्यस्य (ii) हर्षवर्धनस्य<br>(iii) यशोवर्मणः (iv) सिन्धुराजस्य<br>(घ) 'नयचन्द्रसूरिः' किम् ऐतिहासिकं महाकाव्यम् अरचयत्?<br>(i) कुमारपालचरितम् (ii) हम्मीर–महाकाव्यम्<br>(iii) मधुराविजयम् (iv) पृथ्वीराजविजयम् | 1×3=3 |
| | | |
| 16. | प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) एतेषु कः गद्यकाव्यस्य प्रमुखः कविः नास्ति? | 1×3=3 |

(i) दण्डी (ii) सुबन्धुः

(iii) बाणभट्टः (iv) कालिदासः

(ख) 'कन्दर्पकेतुः' इति नाम्नः नृपस्य वर्णनं कस्मिन् गद्यकाव्ये अस्ति?

(i) वासवदत्तायाम् (ii) हर्षचरिते

(iii) शिवराजविजये (iv) कादम्बर्याम्

(ग) 'भारतचम्पू' इत्यस्मिन् ग्रन्थे कस्य कथा अस्ति?

(i) रामायणस्य (ii) शिवपुराणस्य

(iii) महाभारतस्य (iv) भागवतपुराणस्य

(घ) चम्पूकाव्यं किं भवति?

(i) गद्यमयम् (ii) गद्यपद्यमयम्

(iii) पद्यमयम् (iv) संवादात्मकम्

**17. प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1×4=4**

(क) अभिज्ञानशाकुन्तलस्य नायकः कः अस्ति?

(i) भीमः (ii) रामः

(iii) भरतः (iv) दुष्यन्तः

(ख) भरतमुनिः कं ग्रन्थम् अरचयत्?

(i) मृच्छकटिकम् (ii) नाट्यशास्त्रम्

(iii) मालविकाग्निमित्रम् (iv) मुद्राराक्षसम्

(ग) 'शारिपुत्रप्रकरणम्' इति रूपकस्य रचयिता कः अस्ति?

(i) शूद्रकः (ii) नागानन्दः

(iii) अश्वघोषः (iv) विशाखदत्तः

(घ) 'महावीरचरितम्' इति नाटकस्य रचयिता कः अस्ति?

(i) भवभूतिः (ii) कालिदासः

(iii) भट्टनारायणः (iv) भासः

(ङ) वेणीसंहारम्' इति नाटकस्य प्रधानः रसः कः अस्ति?

(i) हास्यरसः (ii) श्रृङ्गाररसः

(iii) वीररसः (iv) करुणरसः

| | | |
|---|---|---|
| | **खण्डः -'ङ'**<br>**छन्दोऽलङ्कारपरिचयः - 10 अङ्काः** | |
| | | |
| 18. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) शिखरिणी छन्दसः लक्षणं किम्?<br>(ख) 'उक्ता ....... तभजाजगौगः' इति कस्य छन्दसः लक्षणम् अस्ति?<br>(ग) 'भगण' इत्यस्य सङ्क्षिप्त–चिह्नानि कानि सन्ति?<br>(घ) अनुष्टुप् छन्दसः एकम् उदाहरणं लिखत।<br>(आ) अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तं छन्दं परिचीय तस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) महिम्नामेतस्मिन् विनयशिशिरो मौग्ध्यमसृणो।<br>(ख) पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्।<br>(ग) तमर्चयित्वा विधिवद्विधिज्ञः तपोधनं मानधनाग्रयायी। | 1×3=3<br><br><br><br><br><br>1×2=2 |
| | | |
| 19. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) यमकालङ्कारस्य लक्षणं लिखत।<br>(ख) श्लेषालङ्कारस्य एकम् उदाहरणं लिखत।<br>(ग) 'तद्रूपकमभेदो य उपमानोपमेययोः' इति कस्यालङ्कारस्य लक्षणम् अस्ति?<br>(घ) उपमायाः किं लक्षणम् अस्ति?<br>(आ) अधोलिखतासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम्।<br>(ख) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।<br>(ग) रमते न मरालस्य मानसं मानसं विना। | 1×3=3<br><br><br><br><br><br>1×2=2 |

*************************************